"इत्थान्न मां भगवति ! प्रविनाशितुं चे-
न्नेच्छास्ति ते कुरु दयां परिहृत्य मौनम् ।
कस्मादिमौ प्रकटितौ किल कालरूपौ
यद्वा भवानि ! हसितुं नु किमिच्छसे त्वम् ॥" )

**प्रकम्पनः**, पुं, (प्रकम्पयतीति । प्र + कपि + णिच् + ल्युः ।) वायुः । इति हेमचन्द्रः ॥ (यथा, माघे । १ । ६१ ।
"निशान्तनारीपरिधानधूनन-
स्फुटागसाप्यूरुषु लोलचक्षुषः ।
प्रियेण तस्यानपराधबाधिताः
प्रकम्पनेनानुचकम्पिरे सुराः ॥" )
नरकविशेषः । इति शब्दरत्नावली ॥ ( राक्षसविशेषः । इति रामायणम् ॥ प्र + कपि + ल्युट् ।) कम्पातिशये, क्ली ॥

**प्रकरं**, क्ली, ( प्रकीर्य्यते इति । प्र + कॄ + कर्म्मणि अप् । ) अगुरु । इति मेदिनी । रे, १७६ ॥

**प्रकरः**, पुं, ( प्रकिरतीति । प्र + कॄ + अच् । ) समूहः । ( प्रकीर्य्यते इति । प्र + कॄ + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् । ) विकीर्णकुसुमादिः । इति मेदिनी । रे, १७८ ॥ ( यथा, अम्बाष्टके । ३ ।
"यत्राशयो लगति तत्रागजा वसतु कुत्रापि निस्तुलशुका
सुत्रामकालमुखसत्राशनप्रकरसुत्राणकारिचरणा ।
छत्रानिलातिरयपत्राभिरामगुणमित्रामरीसमवधूः
कुत्रासहन्मणिविचित्राकृतिः स्फुरितपुत्रादिदाननिपुणा ॥" )

**प्रकरणं**, क्ली, ( प्रक्रियते अस्मिन्निति । प्र + कृ + आधारे ल्युट् ।) प्रस्तावः । (वृत्तान्तः । इत्यमरः । ३ । ३ । ६२ ॥ यथा, महाभारते । ३।२०४।२६ ।
"एतत्प्रकरणं राजन्नधिकृत्य युधिष्ठिर ! ।
पतिव्रतानां नियतं धर्म्मश्चावहितः शृणु ॥" )
अभिनेयप्रकारः । रूपकभेदः । इति हेमचन्द्रः ॥ ग्रन्थसन्धिः । इति त्रिकाण्डशेषः ॥ पादः । स तु एकार्थावच्छिन्नसूत्रसमूहः । इति मुग्धबोधटीकायां दुर्गादासः ॥ ( नाटकोक्तप्रकरणं तल्लक्षणादिर्यथा, साहित्यदर्पणे । ६।२४०—२४१ ।
"भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम् ।
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक् ॥
सापायधर्म्मकामार्थपरो धीरप्रशान्तकः ॥
विप्रनायकं यथा मृच्छकटिकम् । अमात्यनायकं मालतीमाधवम् । वणिङ्नायकं पुष्पभूषितम् ।
नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित् ।
तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः ॥
कितवद्यूतकारादिविटचेटकसङ्कुलः ॥
कुलस्त्री पुष्पभूषिते । वेश्या तु रङ्गवृत्ते । द्वे अपि मृच्छकटिके । अस्य नाटकप्रतिकृतित्वात् शेषं नाटकवत् ॥" )

**प्रकरी**, स्त्री, (प्रकीर्य्यते अत्रेति । प्र + कॄ + अप् । गौरादित्वात् ङीष् ।) नाट्याङ्गम् । चत्वरभूमिः । इति शब्दरत्नावली ॥

**प्रकर्षः**, पुं, ( प्र + कृष् + भावे घञ् । ) उत्कर्षः । यथा, काव्यप्रकाशे ।
"गुणप्रकर्षेण जनोऽनुरज्यते
जनानुरागप्रभवा हि सम्पदः ॥"
( यथा च महाभारते । १ । १५६ । ३४ ।
"बालोऽपि यौवनं प्राप्य मानुषेषु विशाम्पते ! ।
सर्व्वास्त्रेषु परं वीरः प्रकर्षमगमद्बली ॥" )

**प्रकाण्डः**, पुं क्ली, ( प्रकृष्टः काण्डः इति प्रादिसमासः । ) मूलादारभ्य शाखावधिस्कन्धभागः । गुँड़ी इति भाषा ॥ तत्पर्य्यायः । स्कन्धः २ । इत्यमरः । २ । ४ ।१०॥ काण्डम् ३। इति शब्दरत्नावली ॥ दण्डः ४ । इति राजनिर्घण्टः ॥ विटपः । शस्तः । इति मेदिनी । डे, ३१ ॥ ( यथा, अमरे । १ । ४ । २७ ।
"मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ ।
प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः ॥" )
प्रकाण्ड + स्वार्थे कन्प्रत्ययेन प्रशस्तार्थे । यथा, भट्टौ । ५ । ६ ।
"दण्डकामध्यवास्तां यौ वीर ! रक्षःप्रकाण्डकौ ।
शूर्प्यां संक्षोभयातां तौ सभ्यौ भूमिवर्द्धनौ ॥"
"रक्षःप्रकाण्डकौ प्रशस्तौ राक्षसौ ।" इति तट्टीकायां जयमङ्गलः ॥ )

**प्रकाण्डरः**, पुं, ( प्रकाण्डं राति गृह्णातीति । रा + कः । ) वृक्षः । इति शब्दचन्द्रिका ॥

**प्रकामं**, त्रि, ( प्रगतं काममिति प्रादिसमासः । ) यथेप्सितम् । इत्यमरः ॥ ( यथा, महाभारते । ४ । १३ । २६ ।
"चित्रमाल्याम्बरधरा सर्व्वाभरणभूषिता ।
कामं प्रकामं सेव त्वं मया सह विलासिनि ! ॥")

**प्रकारः**, पुं, ( प्रभेदकरणं प्रकृष्टकरणं वेति । प्र + कृ + घञ् ।) भेदः । (यथा, पञ्चदश्याम्।७।१४४।
"अश्नाति वा नवाश्नाति भुङ्क्ते वा स्वेच्छयान्यथा ।
येन केन प्रकारेण सुधामपनिनीषति ॥" )
सादृश्यम् । इत्यमरः । २ । ६ । ५७ ॥

**प्रकाशं**, क्ली, ( प्रकाशते इति । प्र + काश + अच् ।) कांस्यम् । इति हेमचन्द्रः ॥ ( दीप्तिः । यथा, महाभारते । ३ । १७१ । २७ ।
"पुनः प्रकाशमभवत् तमसा ग्रस्यते पुनः ।
भवत्यदर्शनो लोकः पुनरप्सु निमज्जति ॥" )

**प्रकाशः**, पुं, (प्रकाशते इति । प्र + काश + अच् ।) रौद्रः । तत्पर्य्यायः । द्योतः २ आतपः ३ । इत्यमरः । १ । ४ । ३४ ॥ राजनिर्घण्टोक्तपर्य्यायाः प्रभाशब्दे द्रष्टव्याः ॥ ( यथा, पञ्चदश्याम् । २ । १८ ।
"निर्व्वर्ग्य ह्रीमदृश्येत् प्रकाशतमसी विना ।
क्व इदं किञ्च ते पश्येन्न प्रत्यक्षं वियत् खलु ॥")
प्रदीप्तः । तत्पर्य्यायः । स्फुटम् २ स्पष्टम् ३ प्रकटम् ४ उल्वणम् ५ व्यक्तम् ६ । इति हेमचन्द्रः ॥ प्रयत्नम् ७ उद्रिक्तम् ८ । इति जटाधरः ॥ प्रहासः । इति मेदिनी । शे, २४ ॥ अतिप्रसिद्धः । इति शब्दरत्नावल्यमरौ ॥

**प्रकाशकः**, त्रि, प्रकाशकर्त्ता । प्रकाशयतीत्यर्थे ( ण्वुल् ) णकप्रत्ययः ॥ (यथा, भगवद्गीतायाम् । १४ । ६ ।
"तत्र सत्त्वं निर्म्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ! ॥" )

**प्रकाशकज्ञाता**, [ ऋ ] पुं, ( प्रकाशकस्य प्रातःतस्य ज्ञाता । ) कुक्कुटः । इति शब्दचन्द्रिका ॥ प्रकाशकज्ञातरि, त्रि ॥

**प्रकाशात्मा**, [ न् ] पुं, ( प्रकाश आत्मा स्वरूपं देहो वा यस्य । ) सूर्य्यः । इति शब्दचन्द्रिका ॥ व्यक्तस्वभावे, त्रि ॥

**प्रकाशितं**, त्रि, (प्रकाशो जातोऽस्येति । प्रकाश + तारकादित्वात् इतच् । यद्वा, प्र + काश + णिच् + क्तः । ) प्रकाशविशिष्टम् । तत्पर्य्यायः । दर्शितम् २ आविष्कृतम् ३ प्रकटितम् ४ । इति हेमचन्द्रः ॥

**प्रकीर्णं**, क्ली, (प्रकीर्य्यते स्मेति । प्र + कॄ विक्षेपे + क्तः ।) ग्रन्थविच्छेदः । इति जटाधरः ॥ चामरम् । इति त्रिकाण्डशेषः ॥

**प्रकीर्णः**, पुं, (प्रकीर्य्यते दुर्गन्धमनेनेति । प्र + कॄ + क्तः ।) पूतिकरञ्जः । इति राजनिर्घण्टः ॥

**प्रकीर्णः**, त्रि, (प्रकीर्य्यते स्मेति । प्र + कॄ + क्तः ।) विक्षिप्तः । विस्तृतः । यथा,—
"प्रकीर्णभाण्डामनवेक्ष्यकारिणीं
सदैव भर्त्तुः प्रतिकूलवादिनीम् ।
परस्य वेश्माभिरतामलज्जा-
मेवंविधां स्त्रीं परिवर्ज्जयामि ॥"
इति लक्ष्मीचरित्रम् ॥
नानाप्रकारमिश्रितः । यथा,—
"प्रकीर्णः पुष्पाणां हरिचरणयोरञ्जलिरयम् ॥"
इति वेणीसंहारः ।

**प्रकीर्णकं**, क्ली, (प्रकीर्ण + स्वार्थे कन् ।) चामरम् । इत्यमरः । २ । ८ । ३१ ॥ विस्तारः । इति मेदिनी । के, १६६ ॥ ग्रन्थविच्छेदः । इति हेमचन्द्रः ॥ पापविशेषः । तथा विष्णुः । यदनुक्तं तत् प्रकीर्णकम् ।
"प्रकीर्णपातके ज्ञात्वा गुरुत्वमथ लाघवम् ।
प्रायश्चित्तं बुधः कुर्य्यात् ब्राह्मणानुमते सदा ॥"
अनुक्तं अनुक्तनिष्कृतिकं पापम् ।
"अतिपातकाद्यन्यतमलिङ्गविशेषतोऽनुक्तकम् ॥"
इति प्रायश्चित्तविवेकः ॥

**प्रकीर्णकः**, पुं, (प्रकीर्ण + संज्ञायां कन् ।) तुरङ्गमः । इति मेदिनी । के, १६६ ॥ (यथा, महाभारते । ७ । ३५ । ३७ ।
"आरूढ़ान् शिक्षितैर्योधैः शक्त्यृष्टिपाशयोधिभिः ।
विध्वस्तचामरकुथान् विप्रविद्धप्रकीर्णकान् ॥")

**प्रकीर्त्तितं**, त्रि, ( प्रकीर्त्त्यते स्मेति । प्र + कॄत् + क्तः ।) कथितम् । यथा,—